श्चारिष्टनेमिश्च गरुड़श्च महाबलः। अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः" हरिवं० २ तीर्थंकरे जिनभेदे च।

**अरिष्टि** स्त्री न रिष्टिः हिंसा अभावे न०त०। हिंसाभावे। "पोषं रयीणामरिष्टिं तनूनाम् ऋ० २, २१, ६,। 'अरिष्टिमहिंसाम्" भा०।

**अरिष्टुत** त्रि० अरिभिः प्रेरयितृभिः स्तुतं वेदे षत्वम्। प्रेरयितृभिः स्तुते प्रशस्ते "रासते विश्वगूर्त्तो अरिष्टुतः ऋ० ८,१,२२। लोके तु न षत्वम्। [स्यातरि।

**अरिष्ठ** त्रि० अरये तिष्ठते स्था—क वेदे षत्वम्। शत्रुनाशाय

**अरिह** त्रि० अरीन् हन्ति हन—ड। १शत्रुनाशके "हरिहयोऽरिहयोगविचक्षणः" रघुः "पौरवे नृपभेदे" अवाचीनोऽपि वैदर्भीमपरामुपयेमे मर्य्यादां नाम तस्यामस्य जज्ञे अरिहः, अरिहः खल्वङ्गाकुपयेमे" भा० आ० प०।

**अरीढ़** त्रि० न रीढः लीढः न आस्वादितः लस्य रः। १अनास्वादिते। ऋग्वेदे तु ढस्य लहः अरीलहः इत्येव। "अरीलहं वत्सम्" ऋ० ४,१८,१०। अरीलहं शत्रुभिरनभिभूतमानम् भाष्योक्ते २अर्थे च।

**अरीहण** पु० अरिं हन्ति हन—अच् पूर्व्वदीर्घः। नृपभेदे अरीहणेन निर्वृत्तम् वुञ्। आरीहणकम्। चतुरर्थ्याम् उत्करा० छ। अरीहणीयः तत्सन्निकृष्टदेशादौ त्रि०।

**अरीहणादि** पु० अरीहण आदिर्यस्य। निर्वृत्तार्थे विहितवुञ्प्रत्ययनिमित्ते पाणिन्युक्ते शब्दसमूहे। स च गणः अरीहण, द्रुघण, द्रुहण, भगल, उलन्द, किरण, सांपरायण क्रौष्ट्रायण, औष्ट्रायण, त्रैगर्तायन, मैत्रायण भास्त्रायण, वैमतायन। गौमतायन, सौमतायन। सौसायन, धौमतायन, सौमायन, ऐन्द्रायण,। कौन्द्रायण खाडायन, शाण्डिल्यायन, रायस्पोष, विपथ, विपाश। उद्दण्ड, उदञ्चन, खाण्डवीरण, वीरण, कशकृत्स्न, जाम्बवत शिंशपा, रैवत, बिल्व, सुयज्ञ, शिरीष, बधिर जम्बु खदिर सुशर्मन्, दलतृ, भलन्दन, खण्डु, कनल यज्ञदत्त, अरीहणादिः।

**अरुंषिका** अरूंषि मर्मस्थानान्यधिकृत्य जाता ठन् पृ०, सुम्। क्षुद्ररोगभेदे। "समासेन चतुश्चत्वारिंशत्क्षुद्ररोगा भवन्ति॥ तद्यथा अजगल्लिका यवप्रख्याऽन्धालजी विवृता। कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाणगर्द्दभो जालगर्द्दभः कक्षा विस्फोटकोऽग्निरोहिणी चिप्पं कुनखोऽनुशयी विदारिका शर्कराऽर्वुदं पामा विचर्च्चिका रकसा पाददारिका कदरमलसेन्द्रलुप्तौ दारुणकोऽरुंषिका पलितं मसूरिका यौवनपिडका पद्मिनीकण्टको जतुमणिर्म्मशकश्चर्म्मकीलस्तिलकालको न्यच्छं व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्धप्रकशः निरुद्धगुदोऽहिपूतनं वृषणकच्छूर्गुदभ्रंशश्चेति"॥ अरूंषि बहुवक्त्राणि बहुक्लेदानि मूर्द्धनि। कफासृक्क्रिमिकोपेन नृणां विद्यादरुंषिकाम्" "अरुंषिकाहृते रक्ते सेचयेन्निम्बवारिणा" इति च सुश्रुतः।

**अरुग्ण** त्रि० रुग्णः विरोधे न०त०। स्वस्थे रोगशून्ये "रुजदरुग्णं विबलस्य सानुम्" ऋ० ६,३९,२।

**अरुच्** त्रि० नास्ति रुक् कान्तिर्यस्य। प्रकाशहीने मलीमसे "अयं रोचयदरुचोरुचानोऽयम्" ऋ० ६,३९,४॥

**अरुचि** पु० न रुचिर्यत्र। सत्यप्यभिलाषे १भोजनायोग्यतासम्पादके १रोगभेदे। न रुचिः सन्तोषः न०त०। २सन्तोषाभावे 'इत्यरुचेराह' जगदीशः। पूर्व्वोक्ताविततदोषस्य शिथिलत्वशङ्कया सन्तोषाभावादित्यर्थः। भोजनादौ ३अभिलाषाभावे च "सन्निपातक्षयश्वासकासहिक्काऽरुचिप्रलुत्" "स्याद्विरिक्ते कफपित्तकोपो दाहोऽरुचिर्गौरवमग्निसादः" इति च सुश्रुतः।

**अरुज** त्रि० नास्ति रुक् रोगो यस्य। १रोगशून्ये २अनुत्पन्नरोगे च "कोऽरुक् कोऽरुक् कोऽरुक् "इति प्रश्ने" हितभुग्मितभुक्शाकभुक् सोऽरुगित्युद्भटः "अरुक् स एवाप्यचलो महांश्च मर्म्मोत्थितश्चापि विवर्ज्जनीयः' सुश्रुतः।

**अरुज** पु० न रुजति रुज—क। (सोंदाल) इति ख्याते १वृक्षे। नास्ति रुजा यस्मात् ५ब०। २रोगाभावसाधने त्रि० "विषेभ्यः खलु सर्व्वेभ्यः कर्णिकामरुजां स्थिराम्" सुश्रुतः। ३ दानवभेदे पु० दानवगणनायां हरिवं० "अनुह्लादो हरिहयोवराहः संह्रारोऽरुजः"। ६त०। ४रोगशून्ये नीरोगे च त्रि०। "अपाककठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः" सुश्रुतः। "अरुजं वा ह्यतः शूनमन्तः क्लिन्नं स्रवत्यपि" सुश्रु०।

**अरुण** पु० ऋ—उनन्। १सूर्य्ये, २सूर्य्यसारथौ, ३गुड़े, ४सन्ध्यारागे ५निःशब्दे, ६दानवभेदे ७ कुष्ठभेदे, ८पुन्नागवृक्षे। ९ अव्यक्तरागे १० कृष्णमिश्रितरक्तवर्णे च ११ तद्वति त्रि०। १२ कुङ्कुमे, १३ सिन्दूरे च न०। १४ मञ्जिष्ठायाम् १५ श्यामाकायाम्, १६ अतिविषायाम् १७ नदीभेदे १८ कदम्बपुष्पायाञ्च स्त्री। १९ त्रिवृतायां मेदि० २० इन्द्रवारुण्याम् २१ गुञ्जायां राजनि० २२ मुण्डतिक्तायाम् च स्त्री। तत्र अनूरौ 'विभावरी यद्यरुणाय कल्पते' कुमा० "यावत् प्रतापनिधिराक्रमते न भानुरह्नाय तावदरुणेन तमो निरस्तम्" रघुः। "तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्च